श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीहयवदन कलाकलनमालिका ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयवदन कलाकलनमालिका ॥

सचित्रपूर्णेन्दुनिभं विचित्रं
    सतां वसन्तं हृदये महान्तम्।
अजादियज्ञेशम् अजायमानं
    मधुं भजे विष्णुमहं हयास्यम्॥ १ ॥

विशाखयाधीत विभूतियुग्मः
    सरर्षभध्यातपदाब्जयुग्मः।
श्रुतो हि नाम्ना मधुसूदनो मां
    रमाधवो रक्षतु वाजिवक्त्रः॥ २ ॥

ज्येष्ठं वरिष्ठं मिथुनं मनोज्ञं
    त्रिविक्रमं सत्वगुणावदातम्।
शुक्रस्य शुक्रं नयनापहन्तृ
    ग्रीष्मापहं वाजिमुखं प्रपद्ये॥ ३ ॥

आषाढनूत्नांबुदभव्यदृश्यं
    यद्वामनोऽभीष्टदमश्ववक्त्रम्।
ग्रीष्मार्दितः कर्कटकानुकारी
    श्रये शुचि क्षेत्रम् अतीव भोग्यम्॥ ४ ॥

श्रोणोद्भवं श्रीधरम् अच्छकान्ति
    प्रभुं नभोनायककोटितुल्यम्।
सिंहास्यमाभाति यथैव तत्त्वं
    हयाननं भूरिकृपाभिवर्षि॥ ५ ॥

नभस्यमेतत् जगतां नमस्यं
    भद्रस्य सङ्कल्पकम् आशु भद्रम्।

www.prapatti.com

यथैव कन्या वृणुतेऽनुरूपं
भजे हृषीकेशमहं हयास्यम्॥ ६ ॥

यदाश्वयुक्शारद चन्द्रबिंबं
मनोज्ञम् अश्वास्यमिषे विशेषात्।
तुलाविहीनं मम पद्मनाभं
सदा वदन् शर्म लभेय दिव्यम्॥ ७ ॥

हिंसाकरं वृश्चिकरूपमद्धा
श्रुतिप्रदीपो मधुमाजघान।
सकार्तिकेयादिनुतस्सदोर्जो
दामोदरो नः प्रददातु भद्रम्॥ ८ ॥

मृगाश्वशीर्षो वचसामभूमिः
धनुर्विना दुष्टविनाशकारी॥
हेमाभम् अन्तः करणाभिरामं
सहं भजे केशवम् आदिमूर्तिम्॥ ९ ॥

सहस्ययाश्लिष्टमिदं रहस्यं
पुष्टं प्रकृष्टं मकरेण साकम्।
नारायणं पुष्यतमं हयास्यं
व्याख्यानमुद्रामहितं प्रपद्ये॥ १० ॥

तपो महीयस्सुमहान्मुखोऽयं
यन्माधवाराधनमद्य लब्धम्।
कुंभोम्भसा पूर्ण इवास्मि लोके
माघं भजेयं हयशीर्ष दैवात्॥ ११ ॥

तपस्यतो मे सुचिरं हयास्यः
गोविन्दरूपः शुभम् आतनोतु।
नीरोद्धृतो मीन इवान्यथा स्याम्
यत्फल्गुनायोत्तरमस्ति भद्रम्॥ १२ ॥



www.prapatti.com

अत्र्यन्ववायननिना धनिना हरिसेवया।
मणिना गुणिना सान्द्रा कलिता मणिमालिका॥ १३ ॥

॥ इति श्रीहयवदन कलाकलनमालिका संपूर्णा ॥

www.prapatti.com